## 2.3.6 उच्च स्तरीय कार्यक्रमों में उच्च शास्त्रीय पाठ पढ़ाते समय सरल मानक संस्कृत/संस्कृत का उपयोग।

***Use of Simple Standard Sanskrit/ Sanskrit while teaching higher shastric text in higher level programmes.***

---

अस्मिन् विश्वविद्यालये भवत्सु उच्चतरकार्यक्रमेषु उच्चशास्त्रीयपाठस्य अध्यापने च सरलमानकसंस्कृतस्य प्रयोगः क्रियते।

अत्र यथानियमं सर्वे अध्यापकाः संस्कृतस्य विषयान् संस्कृतेन एव अध्यापयन्ति। ते शास्त्राणां गूढान् विषयान् अपि सरलेन संस्कृतेन सरलतया बुद्धिगम्यान् कुर्वन्ति। तत्र आचार्यैः केचन सिद्धान्ताः अङ्गीकृताः सन्ति यान् व्यवहारे समानीय ते सरलेन संस्कृतेनैव सर्वमपि विषयं सरलमेव विद्यते। तद्यथा –

**पाठेषु सरलसंस्कृतप्रयोगः**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये अध्यापकाः कक्षायां पाठनकाले अतीव सरलस्य संस्कृतस्य प्रयोगं कृत्वा पाठयन्ति। तेन छात्राणां बुद्धौ गूढोऽपि विषयः सारल्येनैव प्रविशति। ते च छात्राः स्वयमपि सरलस्य संभाषणस्य अभ्यासं कुर्वन्ति येन ते स्वयमपि कमपि ग्रन्थं पठितुं समर्थाः भवन्ति।

**कार्यशालायोजनम्**

सरलमानकस्य संस्कृतस्य प्रचराय प्रसाराय च यथावसरं विश्वविद्यालयः कार्यशालाः अपि आयोजयति। तासु कार्यशालासु ये संस्कृतिष्णाताः विद्वांसो भवन्ति तानाहूय तेषां सरलेन संस्कृतेनैव व्यास्मानादिकं कार्यते। ततः छात्राः अपि एतदवगच्छन्ति यदस्माभिः व्यवहारे सरलमानकस्य संस्कृतस्य प्रयोगः कथं करणीयः तस्य च सरलीस्य संस्कृतस्य अस्माकं शास्त्राध्ययने को लाभ इति ?

**मातृभाषायाः शब्दप्रयोगः**

सर्व विषयं सारलयेन अवबोधनाय तत्तत् क्षेत्रविशेषेण भाषायां विद्यमानानां संस्कृतशब्दानमपि प्रयोगः व्यवहारे क्रियते। तद्यथा केला इत्यस्य कृते उत्कले कदली इति प्रयुज्यते संस्कृति चापि कदली एवेति भाषासौकर्य्यं भवति। एवं हि कटहल इत्यस्य कते महाराष्ट्रे पनस इति प्रयोगः संस्कृते चापि पनस् इत्येव उच्यते। तदेवं यावच्छाक्यं तत् क्षेत्रविशेषे प्रयुक्तानां संस्कृतशब्दानां प्रयोगं विधाय भाषाायाः सरलीकरणं क्रियते।

**पञ्चलकाराणां प्रयोगः**

तथा तु आहत्य संस्कृतभाषायाम् एकादश लकाराः भवन्ति किन्तु संस्कृतभाषायाः सरलीकरणाय अत्र प्रायः लट्-लोट्-लङ्-लिङ्-लृट् इत्येतेषां पञ्चानां लकाराणामेव अधिकाशः प्रयोगः क्रियते। अस्यायं लाभो भवति यत् संस्कृतेन अनभिज्ञो मनुष्योऽपि तदवगन्तुं शक्नोति। पञ्चानां रूपाणि यथा –

| | | | |
|---|---|---|---|
| लट् – | पठति | पठति | पठन्ति |
| लोट् - | पठतु | पठताम् | पठन्तु |
| लङ् - | अपठत् | अपठताम् | अपठन् |
| विधिलिङ् | पठेत् | पठेताम् | पठेयुः |
| लृट् | पठिष्यति | पठिष्यतः | पठिष्यन्ति |

इति संक्षेपेण द्रष्टुं शक्यते यदिने लकाराः सर्वजनगम्याः सरलाश्च भवन्ति सर्वे चैतान् लकारान् प्रयोक्तुमर्हन्ति।

**कर्तृवाच्यस्य प्रयोगः**

संस्कृते तथा तु कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यञ्चेति त्रीणि वाच्यानि भवन्ति किन्त्वत्र भाषायाः सरलीकरणाय प्रायः कर्तृवाच्यस्य एव प्रयोगः क्रियते। कर्तृवाच्ये प्रयोगसारल्यात् सर्वेषां बुद्धिगम्यं भवति। यथा – राम गांव जाता है – रामः ग्रामं गच्छति।

अत्र सरलं प्रयोगं विधायैव अस्माभिः व्यवहारः चालयितुं शक्यो भवति।

**लघुवाक्यप्रयोगः**

स्वीयमभिप्रायं बोधयितुं दीर्घाणां वाक्यानां प्रयोगापेक्षया सरलैः लघुभिरेव वाक्यैः व्यवहारोऽत्र विश्वविद्यालये क्रियते। एतस्य आयं लाभो यत् अधिकांशतः छात्रा अत्र परिसरे संस्कृते नैव भाषक्यापरस्परं व्यवहारं कुर्वन्तः सुलभाः भवन्ति।

**प्राढशब्दानां सरलीकरणम्**

अस्माकं ये ऋषिप्रणीताः ग्रन्थः भवन्ति तेषां भाषा प्रायः सरला एव भवति किन्तु केचन प्रौढाः पारिभाषिक अपि शब्दासत्र प्रयुजयन्ते। तेषागवबोधाय छात्राः सश्रद्धं गुरुचरणेषु उपविशन्ति। ते गुरवश्च समीपमागतानां छात्राणां पुरतः तेषां प्रौढशब्दानां सरलैः शब्दैः व्याख्यानं विधाय छात्राणां बुद्धिसात् कुर्वन्ति।

**भाषायाः सरलीकरणाय केचन शब्दाः**

भाषायाः सरलीकरणाय अस्मिन् विश्वविद्यालये मियः संवादने केचन शब्दाः चिताः सन्ति येषां प्रयोगेण भाषायाः सरलीकरणं भवति। तद्यथा –

तृतीयायाः विभक्तेः स्थाने 'द्वारा' इति प्रयोगः। यथा –

| | | | |
|---|---|---|---|
| रामेण | हरिणा | सरस्वत्या | जगता |
| रामद्वारा | हरिद्वारा | सरस्वतीद्वारा | जगद्द्वारा |

एवमेव पञ्चम्या स्थाने 'तः' इति प्रयोग। यथा –

| | | | |
|---|---|---|---|
| रामात् | हरेः | सरस्वत्याः | जगतः |
| रामतः | हरिः | सरस्वतीतः | जगत्तः |

एतेषां प्रयोगेण अयं लाभो भवति यत् संस्कृते विद्यमानानां आकाशदीनां भिन्नानां शब्दानां तत् तत् विभक्तीनां रूपाणि 'अस्मृत्वा अपि कार्यं भवितुमर्हति। इत्थं हि 'इयम्' इति प्रयोगेणापि भाषासरलता भवति। यथा 'द्वौ बालकौ' 'द्वे पुस्तके' 'द्वे बालिके' इति वक्तव्ये 'बालक द्वयम्' 'पुस्तकद्वयम्' 'बालिकाइमम्' इति प्रयोगेण साक्षादेव भाषायाः सरलीकरणं दृश्यते इति।

**परस्मैदिधातूनां प्रयोगः**

भाषायाः सरलीकरणाय अयमपि एकः प्रकल्पः यत् उभयपदिनां यद्वां आत्मने पदिनां धातूनां स्थाने परस्मैपदिनां धातूनाम् अधिकः प्रयोगः भवति यतोहि अन्यापेक्षया एतस्य परस्मैपदस्य प्रयोगः किञ्चित् सरलो भवति।

**पुस्तकलेखनम्**

छात्राणां भाषायाः सरलीकरणाय अध्यापकाः सरलमानकसंस्कृते पुस्तकानि अपि स्वयन्ति येन छात्रा, तद्विषयं सम्यगवगच्छन्ति निजकनिष्ठानपि च तद्विषयं बोधयन्ति। एवमेव तेषामवबोधाय लब्धावसरैः शिक्षकैः सरलसंस्कृते एव लघुचलचित्रनिर्माणं (विडियो) अपि क्रियते। एतत् सर्वम् अतिरिच्य यथावसरं परस्परं अध्यापकाः संवादमाध्यमेन अयान् अपि उपायान् अङ्गीकृत्य व्यवहारे आनयन्ति यो सरलकानकसंस्कृतमाध्यमेन समाजस्य अधिकाधिको लाभो भवेदिति।

- ❖ पाठेषु सरलसंस्कृतप्रयोगः।
- ❖ कार्यशालायोजनम्।
- ❖ मातृभाषायाः शब्दप्रयोगः।
- ❖ पञ्चलकारणां प्रयोगः।
- ❖ कर्तृवाच्यस्य प्रयोगः।
- ❖ लघुवाक्यप्रयोगः।
- ❖ प्रौढशब्दानां सरलीकरणम्।
- ❖ भाषायाः सरलीकरणाय केचन शब्दाः।
- ❖ परस्मैदिधातूनां प्रयोगः।
- ❖ पुस्तकलेखनम्।